श्री सुब्रह्मण्य हृदय स्तोत्रं

श्री सुब्रह्मण्य हृदय स्तोत्रं

अस्य श्रीसुब्रह्मण्यहृदयस्तोत्रमहामंत्रस्य, अगस्त्यो भगवान् ऋषिः, अनुष्टुप्छंदः, श्रीसुब्रह्मण्यो देवता, सौं बीजं, स्वाहा शक्तिः, श्रीं कीलकं, श्रीसुब्रह्मण्य प्रसादसिद्ध्यर्थे जपे विनियोगः ||

करन्यासः –
सुब्रह्मण्याय अंगुष्ठाभ्यां नमः |
षण्मुखाय तर्जनीभ्यां नमः |
शक्तिधराय मध्यमाभ्यां नमः |
षट्कोणसंस्थिताय अनामिकाभ्यां नमः |
सर्वतोमुखाय कनिष्ठिकाभ्यां नमः |
तारकांतकाय करतलकरपृष्ठाभ्यां नमः ||
हृदयादि न्यासः –
सुब्रह्मण्याय हृदयाय नमः |
षण्मुखाय शिरसे स्वाहा |
शक्तिधराय शिखायै वषट् |
षट्कोणसंस्थिताय कवचाय हुं |
सर्वतोमुखाय नेत्रत्रयाय वौषट् |
तारकांतकाय अस्त्राय फट् |
भूर्भुवस्सुवरोमिति दिग्बंधः ||

ध्यानं |
षड्वक्त्रं शिखिवाहनं त्रिनयनं चित्रांबरालंकृतं
वज्रं शक्तिमसिं त्रिशूलमभयं खेटं धनुश्चक्रकं |
पाशं कुक्कुटमंकुशं च वरदं दोर्भिर्दधानं सदा
ध्यायामीप्सित सिद्धिदं शिवसुतं श्रीद्वादशाक्षं गुहं ||

लमित्यादि पंचपूजां कुर्यात् |

पीठिका |
सत्यलोके सदानंदे मुनिभिः परिवेष्टितं |
पप्रच्छुर्मुनयः सर्वे ब्रह्माणं जगतां गुरुं || 1 ||

भगवन् सर्वलोकेश सर्वज्ञ कमलासन |
सदानंद ज्ञानमूर्ते सर्वभूतहिते रत || 2 ||

बहुधा प्रोक्तमेतस्य गुहस्य चरितं महत् |
हृदयं श्रोतुमिच्छामः तस्यैव क्रौंचभेदिनः || 3 ||

ब्रह्मोवाच |
शृण्वंतु मुनयः सर्वे गुह्याद्गुह्यतरं महत् |
सुब्रह्मण्यस्य हृदयं सर्वभूतहितोदयं || 4 ||

सर्वार्थसिद्धिदं पुण्यं सर्वकार्यैक साधनं |
धर्मार्थकामदं गुह्यं धनधान्यप्रवर्धनं || 5 ||

रहस्यमेतद्देवानां अदेयं यस्य कस्यचित् |
सर्वमित्रकरं गोप्यं तेजोबलसमन्वितं || 6 ||

प्रवक्ष्यामि हितार्थं वः परितुष्टेन चेतसा |
हृत्पद्मकर्णिकामध्ये ध्यायेत्सर्वमनोहरं || 7 ||

अथ हृदयं |
सुवर्णमंडपं दिव्यं रत्नतोरणराजितं |
रत्नस्तंभसहस्रैश्च शोभितं परमाद्भुतं || 8 ||

परमानंदनिलयं भास्वत्सूर्यसमप्रभं |
देवदानवगंधर्वगरुडैर्यक्षकिन्नरैः | || 9 ||

सेवार्थमागतैः सिद्धैः साध्यैरध्युषितं सदा |
महायोगींद्रसंसेव्यं मंदारतरुमंडितं || 10 ||

मणिविद्रुमवेदीभिर्महतीभिरुदंचितं |
तन्मध्येऽनंतरत्न श्रीच्छटामंडलशोभितं || 11 ||

रत्नसिंहासनं दिव्यं रविकोटिसमप्रभं |
सर्वाश्चर्यमयं पुण्यं सर्वतः सुपरिष्कृतं || 12 ||

तन्मध्येऽष्टदलं पद्मं उद्यदर्कप्रभोदयं |
निगमागमरोलंबलंबितं चिन्मयोदयं || 13 ||

दिव्यं तेजोमयं दिव्यं देवताभिर्नमस्कृतं |
देदीप्यमानं रुचिभिर्विशालं सुमनोहरं || 14 ||

तन्मध्ये सर्वलोकेशं ध्यायेत्सर्वांगसुंदरं |
अनंतादित्यसंकाशं आश्रिताभीष्टदायकं || 15 ||

अचिंत्यज्ञानविज्ञानतेजोबलसमन्वितं |
सर्वायुधधरं दिव्यं सर्वाश्चर्यमयं गुहं || 16 ||

महार्ह रत्नखचित षट्किरीटविराजितं |
शशांकार्धकलारम्य समुद्यन्मौळिभूषणं || 17 ||

मदनोज्ज्वलकोदंडमंगळभ्रूविराजितं |
विस्तीर्णारुणपद्मश्री विलसद्द्वादशेक्षणं || 18 ||

चारुश्रीवर्णसंपूर्णमुखशोभाविभासुरं |
मणिप्रभासमग्रश्रीस्फुरन्मकरकुंडलं || 19 ||

लसद्दर्पणदर्पाढ्य गंडस्थलविराजितं |
दिव्यकांचनपुष्पश्रीनासापुटविराजितं || 20 ||

मंदहासप्रभाजालमधुराधर शोभितं |
सर्वलक्षणलक्ष्मीभृत्कंबुकंधर सुंदरं || 21 ||

महानर्घमहारत्नदिव्यहारविराजितं |
समग्रनागकेयूरसन्नद्धभुजमंडलं || 22 ||

रत्नकंकणसंभास्वत्कराग्र श्रीमहोज्ज्वलं |
महामणिकवाटाभवक्षःस्थलविराजितं || 23 ||

अतिगांभीर्यसंभाव्यनाभीनवसरोरुहं |
रत्नश्रीकलिताबद्धलसन्मध्यप्रदेशकं || 24 ||

स्फुरत्कनकसंवीतपीतांबरसमावृतं |
शृंगाररससंपूर्ण रत्नस्तंभोपमोरुकं || 25 ||

स्वर्णकाहलरोचिष्णु जंघायुगळमंडलं |
रत्नमंजीरसन्नद्ध रमणीय पदांबुजं || 26 ||

भक्ताभीष्टप्रदं देवं ब्रह्मविष्ण्वादिसंस्तुतं |
कटाक्षैः करुणादक्षैस्तोषयंतं जगत्पतिं || 27 ||

चिदानंदज्ञानमूर्तिं सर्वलोकप्रियंकरं |
शंकरस्यात्मजं देवं ध्यायेच्छरवणोद्भवं || 28 ||

अनंतादित्यचंद्राग्नि तेजः संपूर्णविग्रहं |
सर्वलोकैकवरदं सर्वविद्यार्थतत्त्वकं || 29 ||

सर्वेश्वरं सर्वविभुं सर्वभूतहिते रतं |
एवं ध्यात्वा तु हृदयं षण्मुखस्य महात्मनः || 30 ||

सर्वान्कामानवाप्नोति सम्यक् ज्ञानं च विंदति |
शुचौ देशे समासीनः शुद्धात्मा चरिताह्निकः || 31 ||

प्राङ्मुखो यतचित्तश्च जपेद्धृदयमुत्तमं |
सकृदेव मनुं जप्त्वा संप्राप्नोत्यखिलं शुभं || 32 ||

इदं सर्वाघहरणं मृत्युदारिद्र्यनाशनं |
सर्वसंपत्करं पुण्यं सर्वरोगनिवारणं || 33 ||

सर्वकामकरं दिव्यं सर्वाभीष्टप्रदायकं |
प्रजाकरं राज्यकरं भाग्यदं बहुपुण्यदं || 34 ||

गुह्याद्गुह्यतरं भूयो देवानामपि दुर्लभं |
इदं तु नातपस्काय नाभक्ताय कदाचन || 35 ||

न चाशुश्रूषवे देयं न मदांधाय कर्हिचित् |
सच्छिष्याय कुलीनाय स्कंदभक्तिरताय च || 36 ||

सतामभिमतायेदं दातव्यं धर्मवर्धनं |
य इदं परमं पुण्यं नित्यं जपति मानवः |
तस्य श्री भगवान् स्कंदः प्रसन्नो भवति ध्रुवं || 37 ||

इति श्रीस्कांदपुराणे सुब्रह्मण्यहृदयस्तोत्रं ||